

# Sri Varaha Kavacham - Skanda Puranam

## || श्री वराह कवचम् - श्री स्कन्द पुराणम् ||

The following is a very rare Kavacha Stotram on **Lord Varaha** from **Skanda Puranam**. This hymn is apparently from **Srimushna Mahatmyam** which is not included in the print edition of Skanda Puranam but this is not unusual as many of the commonly used Sahasranamas which claim origin to specific Puranas are not found in the print editions because bits and pieces of various Purans are in possession by innumerable sources.

**Varaha Kavacha** is one of the utmost potent Kavacha Stotras ever although there are hundreds of Kavcha Stotras available on Lord Vishnu (and other deities). This Kavacha is on Lord Varaha of Srimushnam, one of the eight Svayamvyakta Kshetras of Lord Vishnu. [Srimushnam is about 20kms from **Vriddhachalam** en route to **Chidambaram** from **Chennai**]

One who chants this Kavacha gets innumerable benefits – relief from diseases, enemies, demons, venomous animals, etc. People who are suffering from treacherous **Rahu Dasha or Bhukti** can get immense benefits by chanting this kavacham daily. People will regain kingdoms and wealth which were lost but rightfully belong to them.

It is prescribed that one should chant this Kavacham 100 times on a Sunday in Srimushna Kshetra seated near the Pushkarini after having due darshan of Lord Narasimha below the banyan tree early in the morning. After completing the chanting, the person should go to the temple and perform archana to **Lord Varaha** and **Goddess Ambujavalli (Lakshmi)**. This can get untold benefits to the person who chants.

आद्यं रङ्गमिति प्रोक्तं विमानं रङ्ग संज्ञितम् ।
श्रीमुष्णं वेङ्कटाद्रिं च साळग्रामं च नैमिशम् ।
तोयाद्रिं पुष्करं चैव नर नारायणाश्रमम् ।
अष्टौ मे मूर्तयः सन्ति स्व्यं व्यक्ता महीतले ॥

श्री सूत उवाच -

श्री रुद्र मुख निर्णीत मुरारि गुण सत्कथा ।
सन्तुष्टा पार्वती प्राह शङ्करं लोक शङ्करम् ॥ १ ॥

श्री पार्वती उवाच -

श्रीमुष्णेशस्य माहात्म्यं वराहस्य महात्मनः ।
श्रुत्वा तृप्तिर् न मे जाता मनः कौतूहलायते ।
श्रोतुं तद् देव माहात्म्यं तस्माद् वर्णय मे पुनः ॥ २ ॥

श्री शङ्कर उवाच -

श्रुणु देवि प्रवक्ष्यामि श्रीमुष्णेशस्य वैभवम् ।
यस्य श्रवण मात्रेण महा पापैः प्रमुच्यते ॥ ३ ॥

सर्वेषां एव तीर्थानां तीर्थराजो ऽ भिधीयते ॥ ४ ॥
नित्य पुष्करिणी नाम्नी श्रीमुष्णे या च वर्तते ।
जाता श्रमापहा पुण्या वराह श्रम वारिणा ॥ ५ ॥

विष्णोर् अङ्गुष्ठ संस्पर्शात् पुण्यदा खलु जाह्नवी ।
विष्णोः सर्वाङ्ग संभूता नित्य पुष्करिणी शुभा ॥ ६ ॥

महानदी सहस्रेण नित्यदा संगता शुभा ।
सकृत् स्नात्वा विमुक्ताघः सद्यो याति हरेः पदम् ॥ ७ ॥

तस्या आग्नेय भागे तु अश्वत्तच् छाययोदके ।
स्नानं कृत्वा पिप्पलस्य कृत्वा चापि प्रदिक्षिणम् ॥ ८ ॥

दृष्ट्वा श्वेत वराहं च मासमेकं नयेद्यदि ।
काल मृत्युं विनिर्जित्य श्रिया परमया युतः ॥ ९ ॥

आधि व्याधि विनिर्मुक्तो ग्रह पीडा विवर्जितः ।
भुक्त्वा भोगान् अनेकांश् च मोक्षं अन्ते व्रजेत् धृवम् ॥ १० ॥

अश्वत्त मूले ऽ र्क वारे नित्य पुष्करिणी तटे ।
वराह कवचं जप्त्वा शत वारं जितेन्द्रियः ॥ ११ ॥

क्षया ऽ पस्मार कुष्ठाद्यैः महारोगैः प्रमुच्यते ।
वराह कवचं यस्तु प्रत्यहं पठते यदि ॥ १२ ॥

शत्रु पीडा विनिर्मुक्तो भूपतित्वं अवाप्नुयात् ।
लिखित्वा धारयेद् यस्तु बाहु मूले गले ऽ थ वा ॥ १३ ॥

भूत प्रेत पिशाचाद्याः यक्ष गन्धर्व राक्षसाः ।
शत्रवो घोर कर्माणो ये चान्ये विष जन्तवः ।
नष्ट दर्पा विनश्यन्ति विद्रवन्ति दिशो दश ॥ १४ ॥

श्री पार्वती उवाच -

तत् ब्रूहि कवचं मह्यं येन गुप्तो जगत् त्रये ॥ १५ ॥

संचरेत् देववन् मर्त्यः सर्व शत्रु विभीषणः ।
येनाप्नोति च साम्राज्यं तन्मे ब्रूहि सदाशिव ॥ १६ ॥

श्री शङ्कर उवाच -

श्रुणु कल्याणि वक्ष्यामि वराह कवचं शुभम् ।
येन गुप्तो लभेन् मर्त्यो विजयं सर्व संपदम् ॥ १७ ॥

अङ्ग रक्षा करं पुण्यं महा पातक नाशनम् ।
सर्व रोग प्रशमनं सर्व दुर्ग्रह नाशनम् ॥ १८ ॥

विशा ऽ भिचार कृत्यादि शत्रु पीडा निवारणम् ।
नोक्तं कस्यापि पूर्वं हि गोप्यात् गोप्यतरं यतः ॥ १९ ॥

वराहेण पुरा प्रोक्तं मह्यं च परमेष्ठिने ।
युद्धिएषु जयदं देवी शत्रु पीडा निवारणम् ॥ २० ॥

वराह कवचात् गुप्तो ना ऽ शुभं लभते नरः ।
वराह कवचस्यास्य ऋषिर् ब्रह्मा प्रकीर्तितः ॥ २१ ॥

छन्दो ऽ नुष्टुप् तथा देवो वराहो भूपरिग्रहः ।
प्रक्षाल्य पादौ पाणी च संयग् आचम्य वारिणा ॥ २२ ॥

कृत स्वाङ्ग करन्यासः सपवित्र उदङ् मुखः ।
ॐ भूर् भुवः सुवरिति नमो भूपतये ऽ पि च ॥ २३ ॥

नमो भगवते पश्चात् वराहाय नमस् तथा ।
एवं षडङ्गं न्यासं च न्यसेद् अङ्गुलिषु क्रमात् ॥ २४ ॥

नमः श्वेत वराहाय महाकोलाय भूपते ।
यज्ञाङ्गाय शुभाङ्गाय सर्वज्ञाय परात्मने ॥ २५ ॥

स्रव तुण्डाय धीराय परब्रह्म स्वरूपिणे ।
वक्र दंष्ट्राय नित्याय नमो ऽ न्तैर् नामभिः क्रमात् ॥ २६ ॥

अङ्गुलिषु न्यसेद् विद्वान् कर पृष्ठ तलेष्वपि ।
ध्यात्वा श्वेत वराहं च पश्चात् मन्त्रं उदीरयेत् ॥ २७ ॥

## ॥ विनियोगः ॥

ॐ अस्य श्रीवराह कवच स्तोत्र महामन्त्रस्य । ब्रह्मा ऋषिः । अनुष्टुप् छन्दः । वराहो भूपरिग्रह देवता । श्रीवराह प्रीत्यर्थे जपे विनियोगः ॥

## ॥ कर न्यासः ॥

| | |
|---|---|
| ॐ नमो भूपतये | अङ्गुष्ठाभ्यां नमः । |
| ॐ नमो भगवते | तर्जनीभ्यां नमः । |
| ॐ वराहाय नमः | मध्यमाभ्यां नमः । |
| ॐ नमो भूपतये | अनामिकाभ्यां नमः । |
| ॐ नमो भगवते | कनिष्ठिकाभ्यां नमः । |
| ॐ वराहाय नमः | कर तल कर पृष्ठाभ्यां नमः ॥ |

## ॥ हृदयादि न्यासः ॥

| | |
|---|---|
| ॐ नमो भूपतये | हृदयाय नमः । |
| ॐ नमो भगवते | शिरसे स्वाहा । |
| ॐ वराहाय नमः | शिखायै वषाट् । |
| ॐ नमो भूपतये | कवचाय हुं । |
| ॐ नमो भगवते | नेत्र त्रयाय वौषट् । |
| ॐ वराहाय नमः | अस्त्राय फट्। |
| ॐ भूर्भुवस्सुवरों | इति दिग् बन्धः ॥ |

## ॥ ध्यानम् ॥

ॐ श्वेतं वराह वपुषं क्षितिमुद्धरन्तम् ।
शङ्घारि सर्व वरदाभय युक्त बाहुम् ।
ध्यायेन् निजैश्च तनुभिः सकलैर् उपेतम् ।
पूर्णं विभुं सकल वाञ्चित सिद्धये ऽ जम् ॥ १ ॥

## ॥ पञ्च पूजा ॥

| | | |
|---|---|---|
| लं | पृथिव्यात्मने | गन्धं समर्पयामि । |
| हं | आकाशात्मने | पुष्पैः पूजयामि । |
| यं | वाय्वात्मने | धूपं आघ्रापयामि । |
| रं | अग्न्यात्मने | दीपं दर्शयामि । |
| वं | अमृतात्मने | अमृतं महानैवेद्यं समर्पयामि । |

सं सर्वात्मने सर्वोपचार पूजां समर्पयामि ॥

## ॥ कवचम् ॥

वराहः पूर्वतः पातु दक्षिणे दण्डकान्तकः ।
हिरण्याक्ष हरः पातु पश्चिमे गदया युतः ॥ १ ॥

उत्तरे भूमिहृत् पातु अधस्तात् वायु वाहनः ।
ऊर्ध्वं पातु हृषीकेशो दिग्विदिक्षु गदाधरः ॥ २ ॥

प्रातः पातु प्रजानाथः कल्पकृत् सङ्गमे ऽ वतु ।
मध्याह्ने वज्रकेशस् तु सायाह्ने सर्व पूजितः ॥ ३ ॥

प्रदोषे पातु पद्माक्षो रात्रौ राजीव लोचनः ।
निशीन्द्र गर्वहा पातु पातूषः परमेश्वरः ॥ ४ ॥

अटव्यां अग्रजः पातु गमने गरुडासनः ।
स्थले पातु महातेजाः जले पात्ववनी पतिः ॥ ५ ॥

गृहे पातु गृहाध्यक्षः पद्मनाभः पुरो ऽ वतु ।
झिल्लिका वरदः पातु स्वग्रामे करुणाकरः ॥ ६ ॥

रणाग्रे दैत्यहा पातु विषमे पातु चक्र भृत् ।
रोगेषु वैद्यराजस् तु कोलो व्याधिषु रक्षतु ॥ ७ ॥

ताप त्रयात् तपो मूर्तिः कर्म पाशाच् च विश्व कृत् ।
क्लेश कालेषु सर्वेषु पातु पद्मापतिर् विभुः ॥ ८ ॥

हिरण्यगर्भ संस्तुत्यः पादौ पातु निरन्तरम् ।
गुल्फौ गुणाकरः पातु जङ्घे पातु जनार्द्दनः ॥ ९ ॥

जानू च जयकृत् पातु पातूरू पुरुषोत्तमः ।
रक्ताक्षो जघने पातु कटिं विश्वंभरो ऽ वतु ॥ १० ॥

पार्श्वे पातु सुराध्यक्षः पातु कुक्षिं परात्परः ।
नाभिं ब्रह्म पिता पातु हृदयं हृदयेश्वरः ॥ ११ ॥

महादंष्ट्रः स्तनौ पातु कण्ठं पातु विमुक्तिदः ।
प्रभञ्जन पतिर् बाहू करौ कामपिता ऽ वतु ॥ १२ ॥

हस्तौ हंसपतिः पातु पातु सर्वाङ्गुलीर् हरिः ।
सर्वाङ्गश् चिबुकं पातु पात्वोष्ठौ कालनेमिहा ॥ १३ ॥

मुखं तु मधुहा पातु दन्तान् दामदरो ऽ वतु ।
नासिकां अव्ययः पातु नेत्रे सूर्येन्दु लोचनः ॥ १४ ॥

फालं कर्म फलाध्यक्षः पातु कर्णौ महारथः ।
शेषशायी शिरः पातु केशान् पातु निरामयः ॥ १५ ॥

सर्वाङ्गं पातु सर्वेशः सदा पातु सतीश्वरः ॥ १६ ॥

## ॥ फलश्रुतिः ॥

इतीदं कवचं पुण्यं वराहस्य महात्मनः ॥ १ ॥

यः पठेत् श्रुणुयाद् वापि तस्य मृत्युर् विनश्यति ।
तं नमस्यन्ति भूतानि भीताः साञ्जलि पाणयः ॥ २ ॥

राजदस्यु भयं नास्ति राज्य भ्रंशो न जायते ।
यन् नाम स्मरणात् भीताः भूत वेताल राक्षसाः ॥ ३ ॥

महारोगाश् च नश्यन्ति सत्यं सत्यं वदाम्यहम् ।
कण्ठे तु कवचं बद्धिवा वन्ध्या पुत्रवती भवेत् ॥ ४ ॥

शत्रु शैन्य क्षय प्राप्तिः दुःख प्रशमनं तथा ।
उत्पात दुर्निमित्तादि सूचितारिष्ट नाशनम् ॥ ५ ॥

ब्रह्म विद्या प्रबोधं च लभते नात्र संशयः ।
धृत्वेदं कवचं पुण्यं मान्धाता परवीरहा ॥ ६ ॥

जित्वा तु शाम्बरीं मायां दैत्येन्द्रानवधीत् क्षणात् ।
कवचेनावृतो भूत्वा देवेन्द्रो ऽ पि सुरारिहा ॥ ७ ॥

भूम्योपदिष्ट कवच धारणान् नरको ऽ पि च ।
सर्वावध्यो जयी भूत्वा महतीं कीर्तिं आप्तवान् ॥ ८ ॥

अश्वत्त मूले ऽ र्क वारे नित्य पुष्करिणी तटे ।
वराह कवचं जप्त्वा शत वारं पठेद् यदि ॥ ९ ॥

अपूर्व राज्य संप्राप्तिं नष्टस्य पुनरागमम् ।
लभते नात्र सन्देहः सत्यं एतन् मयोदितम् ॥ १० ॥

जप्त्वा वराह मन्त्रं तु लक्षं एकं निरन्तरम् ।
दशांशं तर्पणं होमं पायसेन घृतेन च ॥ ११ ॥

कुर्वन् त्रिकाल सन्ध्यासु कवचेनावृतो यदि ।
भूमण्डलाधिपत्यं च लभते नात्र संशयः ॥ १२ ॥

इदं उक्तं मया देवी गोपनीयं दुरात्मनाम् ।
वरह कवचं पुण्यं संसारार्णव तारकम् ॥ १३ ॥

महा पातक कोटिघ्नं भुक्ति मुक्ति फल प्रदम् ।
वाच्यं पुत्राय शिष्याय सद् वृताय सुधी मतेत् ॥ १४ ॥

श्री सूत उवाच -

इति पत्युर् वचः श्रुत्वा देवी सन्तुष्ट मानसा ।
विनायक गुहौ पुत्रौ प्रपेदे द्वौ सुरार्चितौ ॥ १५ ॥

कवचस्य प्रभावेन लोकमाता च पार्वती ।
य इदं श्रुणुयान् नित्यं यो वा पठति नित्यशः ॥ १६ ॥

स मुक्तः सर्व पापेभ्यो विष्णुलोके महीयते ॥ १७ ॥

---

॥ इति स्कान्द पुराणे श्री वराह कवचम् सम्पूर्णम् ॥